एकैकःपादादिःययोस्तेषाकले ४९ इत्थंनवादमोहतःनराजाभिलापोगोतिद्दर्पायत्राहरेवेमिति ४
इतिश्रीभागवतेदशमस्कन्धेसप्ततितमः ११ ततःविमलतितमेमोचयित्वान्पान्दरिःराजाहेभावोःस्वान्देणा
ग्रस्याप्यप्रनयोयामत श्रत्वनदजरामेपवयानद्रुहम्पतीनविमोदनक्रपयाहकमोनिजद्रूपमदर्शयेत

एकेपादेपदाक्रम्यदोर्भ्यंमत्तोमत्रताव गदत्तःपात्यामासयात्वामिवमहागजः ४४ एक
पादेकहयोकरिमूलनाणके एकबाहुदितिभूकोपाकलेदहणःश्रजाः ४५ हाहाका
रान्महानासीत्रिमयापेश्वरी भूजयामासमभीमपरिरम्भजयाच्युतो ४६ महदेवततेन
यंभयावान्भूतभावनः श्रभ्यविंदमेयात्मामयापान्प्रतिश्रभुः ४७ मोचयामासराज
न्यान्सकहान्मारायेनये ४८ इतिश्रीभागवतेदशमस्कन्धेजरासंधवधोनामद्विसप्ततित
मोध्यायः ११ शुकउवाच अथेतदेषामान्यहालीलयायुधिनिर्जिताः येनिरान्नाविविद्रा
एणेमलिनोमलवाससः १ तन्नामाःश्रकृवदनामरेयायर्किर्पिताः ददृशुस्तेघनश्यामं
पीतकौशेयवाससं २ श्रीवत्साङ्कंचतुर्बाहुंपद्मगर्भारुणेक्षणं चारुप्रसन्नवदनंस्फुरन्मक
रकुण्डलं ३ पद्महस्तंगदाशंखरथांगैरुपलक्षितं किरीटहारकटककटिसूत्रांगदाञ्चितं ४
भ्राजद्वरमणिग्रीवंनिवीतंवनमालया ५ ॥ ॥

येनजिताःजरासंधेननिहताश्चपिरिसेएणानेनतेनिर्गताःसंतोवनश्यामंश्रीहासंददृशुरित्तत्रान्वयः
१ तन्नामाःकृपणाःमरोहयेनपरिकर्षिताः २ भ्राजद्राजमानोवरमणिकौस्तुभोयस्यासौग्रीवायस्य
तंनिवीतंकण्ठलंबितयाव्याप्तं ५ ॥

यथा भवद्भिः प्रार्थितं तथा बाढं निश्चितं वो भवतां मयि भक्तिर्जायते जायतामित्यर्थः १८ हे भूपाः सद्गुणमेव कर्तव्यमिति भवद्भिर्यद्व्यवसितं संकल्पितं दिष्ट्या भवद्भिर्मद्भक्तः सत्यमेव त्याहमवतार इति श्रीसूरैश्वर्यचाभ्योमदः तेनोन्नाहः त्वत्कृते न त्वैवाचारमित्यर्थः पश्ये पश्यामीति तदेवाह हे हैहयेति १९ हैहयः कार्तवीर्यः चक्रवर्ती नरेश्वरः पितुः कामधेनुः हरणात् परशुरामेण मद्रूपेण हतः नहुषो देवेन्द्रतां प्राप्तः पुनस्ततः शचीसेवाते

श्रीभगवानुवाच अद्यप्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे सुदृढा जायते भक्तिर्बाढमाशंसितं तथा १८ दिष्ट्या व्यवसितं भूपा भवन्त ऋतभाषिणः श्रियैश्वर्यमदोन्नाहं पश्ये उन्मादकं नृणाम् १९ हैहयो नहुषो वेनो रावणो नरकोऽपरे श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः २० भवन्त एतद्विज्ञाय देहाद्युत्पाद्यमन्तवत् मां यजन्तोऽध्वरैर्युक्ताः प्रजा धर्मेण रक्षत २१ सन्तन्वन्तः प्रजातन्तून् सुखं दुःखं भवाभवौ प्राप्तं प्राप्तं च सेवन्तो मच्चित्ता विचरिष्यथ २२ उदासीनाश्च देहादावात्मारामा धृतव्रताः मय्यावेश्य मनः सम्यङ् मामन्ते ब्रह्म यास्यथ २३

यद्ब्राह्मणान्महर्षीन् शिबिकायां वाहयन् तैरेव ब्राह्मणैः ततो भ्रंशितो नहुषः अजगरत्वमवाप वेनो पुत्रन्ततो ब्राह्मणानधिक्षिपन् तैरेव ब्राह्मणैर्हुंकारैः हुंकारैर्हतः रावणो राक्षसेश्वरः सीतामभिलषन् श्रीरामचन्द्रेण हतः नरको दैत्येश्वरः अदितिकुण्डलापहरणान्मयैव हतः अपरे श्रीमदात्स्थानाद्भ्रंशिताः २० यस्मात् एतद्देहादिकं अन्तवत् विज्ञाय युक्ताः अप्रमत्ताः रक्षत २१ प्रजातन्तून् उत्पादयन्तः प्राप्तं समत्वेन सेवमानाः २२ मां ब्रह्म यास्यथ २३ ॥

श्रीमदेन नष्टा दृष्टिर्येषां ते अस्याः पृथिव्याः इतरेतरस्पृधः परस्परं स्पर्धमानाः पुरः पुरतः त्वां मृत्युं अविगणय्य
प्रायेणेमे दावये १२ हे कृष्ण त एव वयं अघविनष्टदर्पाः ते चरणौ स्मरामः स्मरतां मा पापास्मरूकण्ये भूताः भवान्
तन्वा मूर्त्या कालेन श्रियो विचालिताः अपि ताः अतो राज्यच्युतिरेव भवदनुग्रहरूपेत्यर्थः १३ अत एव भूयो
न तावन्मृगतृष्णिकारूपं राज्यं पुनर्वाञ्छामः प्रतिक्षणं क्षीयमाणेन तत्पाकजरोगाणां भुवा जन्मभूमिना देहेन

वयं पुरा श्रीमदनष्टदृष्टयो जिगीषयास्या इतरेतरस्पृधः घ्नन्तः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृत्युं पुरस्त्वा
विगणय्य दुर्मदाः १२ त एव कृष्णाद्य गभीररंहसा दुरन्तवीर्येण विचालिताः श्रियः कालेन तन्वा भवतो
ऽनुकम्पया विनष्टदर्पाश्चरणौ स्मराम ते १३ अथो न राज्यं मृगतृष्णिरूपितं देहेन शश्वत्पतता रुजां भुवा
उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनं १४ तं नः समादिशोपायं येन ते चर
णाब्जयोः स्मृतिर्यथा न विरमेदपि संसरतामिह १५ कृष्णाय वासुदेवाय हरये परमात्मने प्रण
तक्लेशनाशाय गोविन्दाय नमो नमः १६ श्रीशुक उवाच संस्तूयमानो भगवान् राजभिर्मुक्तबन्धनैः ता
नाह करुणस्तात शरण्यः श्लक्ष्णया गिरा १७ रामः ॥

देहेनोपासितव्यं सेव्यं न स्पृहयामहे प्रेत्य परलोके च क्रियाफलं स्वर्गादिभोगं चोपासितव्यं न स्पृहयामहे
कर्णयोः रोचनं हि जनकं तत्र गतस्य पुनः पतनेन सुखाभावादित्यर्थः एवंभूतानां स्मृतिर्यथा न विरमेत् तं हि
ममचरणौ स्मरतां तेनाभ्यासेन मुक्तिर्भवति किमिदमपेक्षयेति चेदत आहुः तं न इति १४ त्वच्चरणस्म
स्मृतिरपि त्वत्प्रसादफलमेवेत्यर्थः १५ श्लक्ष्णया मञ्जुलया वाचा १७ रामः ॥

उत्तरे तु कृष्णमतिनिर्मेयं राजसूयक्रियाद्विजैः अग्रेपूजाप्रसंगेन चैद्यवधानाद्विवर्ण्यते राजसूयमखे हत्वा जरासंधं तं इतरे चैद्यादिरतेकुर्वन्तबीजं कलिमिवावयत् १ कृष्णस्यानुभावमिति यत्काराजनस्यकारागार विघातितवान् इत्यर्थः तदाह ये स्युरिति १ ये त्रैलोक्यस्यापि गुरवः स्युः सनकादयः सर्वलोकपालाश्च ते पि शिरसैवतवानुशासनं वहन्ति दुर्लभं लब्ध्वेति भावः बहुमानेनेत्यर्थः २ स भवान् परमेश्वरः अस्माकमनुशासनं धत्ते तदत्यन्तविडंबनं अत्यन्तमनुकरणं स्वतेजोहानि प्रसंगादित्यर्थः अथवा नव परि

श्रीशुक उवाच एवं युधिष्ठिरो राजा जरासंधवधं विभो कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत् १ ये स्युस्त्रैलोक्यगुरवः सर्वे लोका महेश्वराः वहन्ति दुर्लभं लब्ध्वा शिरसैवानुशासनं २ स भवानरवि न्दाक्षो दीनानामीशमानिनां धत्तेनुशासनं भूमंस्तदत्यन्तविडंबनं ३ नह्येकस्याद्वितीयस्य ब्रह्मणः परमात्मनः कर्मभिर्वर्धते तेजो ह्रसते च यथा रवेः ४ न वै तेजित भक्तानां ममाह मिति माधव त्वं तवेति च नानाधीः पशूनामिव वैकृता ५ ॥ राम॥

हणं स्याज्ञापनाज्ञाधारणाभ्यां ते तेजो हानिर्वृद्धी अतः श्रीकृष्णकृपया संगच्छते इत्याह २ समाना समानरहितस्य ब्रह्मणस्तवोभयमायापरमात्मनः इति स एव जीवनियन्तृत्वं नियम्यत्वेहेतुनोनद्वास्त वः अतः परानुग्रहार्थैरेतैः कर्मभिरित्यर्थः तथा च श्रुतिः न कर्मणा वर्धते नो कनीयानिति न त्वेवमप्यहं पर मेश्वरः ममेदं नीचं कर्म अयोग्यमिति मनसि कथं न भवेदत आह न वै त इति ४ हे अजित ते तव भक्तानामे वतावदियं नानाधीः भेदमतिर्नास्ति यथा पशूनामज्ञानां वैकृता गात्रशरीर विषया तव तु नास्तीति किं पुनः

स्त्रियस्तु तेषां मज्जनकर्मणि ॥ सर्वांस्तान्नादोनाद्युक्त १४ सुस्नातान् समलंकृतान् भोगैश्च युक्तानव
राज्ञेन भोजयित्वा पुनः तेषां सपर्यां सहदेवेन कारयामास १६ प्रीणयन्नर्दयित्वा १७ जगदुः ऋचुः १८

शुक उवाच इत्यादिश्य नृपान्कृष्णो भगवान्भुवनेश्वरः तेषां न्ययुंक्त पुरुषान्स्त्रियो मज्जनकर्म
णि १४ सपर्यां कारयामास सहदेवेन भारत नरदेवोचितैर्वस्त्रैर्भूषणैः स्रग्विलेपनैः १५ भो
जयित्वा वरान्नेन सुस्नातान्समलंकृतान् भोगैश्च विविधैर्युक्तांस्ताम्बूलाद्यैर्नृपोचितैः १६ स्ना
तस्नाना गोपमणिकांचनभूषितान् प्रीणयामास तैर्वाक्यैः स्वदेशान्प्रत्ययापयत १७ तप
वे मोचिताः क्लेशात्क्लेशेन सुमहात्मना ययुस्ते मुक्ता यतः कृतार्था जगत्पतेः १८ जगदुः
प्रकृतिस्थास्ते महापुरुषचेष्टितं यथान्वयासद्भगवांस्तथा व कुर्वन्ति ताः १९ जरासंधं चाति
पित्वा भीमसेनेन केशवः पार्थाभ्यां संयुतः प्रायात्सहदेवेन पूजितः २० गत्वा ते खांडवप्र
३ स्थं शंखान्दध्मुर्जितारयः हर्षयन्तः स्वसुहृदो दुर्हृदां चासुखावहाः २१ तच्छ्रुत्वा प्रीतमनस इ
न्द्रप्रस्थनिवासिनः मेनिरे मागधं शान्तं राजा चाप्तमनोरथः २२ अभिवंद्याथ राजानं भीमा
र्जुनजनार्दनाः सर्वमाश्रावयांचक्रुरात्मना यदनुष्ठितं २३ निशम्य धर्मराजस्तत्केशवेनानु
कंपितं आनंदाश्रुकलां मुंचन्प्रेम्णा नोवाच किंचन २४ इति श्रीभागवते दशमस्कंधे जरासं
धवधो नाम त्रिसप्ततितमोऽध्यायः ७३ श्रीः ॥

मः ७३

वोऽश्वप्रस्थमिंद्रप्रस्थे ३१ ... मनोरथो बभूव ३२ इति श्रीभागवते दशमस्कंधे त्रिसप्तति

येऽप्यन्ये देवगणा ये च राजादयः समाहूताः तेन तत्र समीयुः स्म १५ ते सर्वे कृष्णभक्तस्य पाण्डुसुतस्य पार्थस्य रा
जसूयमविस्मिताः सन्तः स्वपमत्रैश्च सम्यग्ज्ञेमे निरेऽन्यन्वयः १५ याजकाऋत्विजः १६ इति ते ह निमो मामिषे

राजानश्च समाहूता राजपत्न्यश्च सर्वशः राजसूये समीयुः स्म राज्ञः पाण्डुसुतस्य वै १५ मेनिरे
कृष्णभक्तस्य सूपपन्नमविस्मिताः १५ अयाजयन्महाराजं याजका देववर्चसः राजसूयेन वि
धिवत्प्राचेतसमिवामराः १६ सौत्येऽहन्यवनीपालो याजकान्सदस्पतीन् अपूजयन्महाभा
गान्यथावत्सुसमाहितः १७ सदस्याग्र्यार्हणार्हं वै विमृशन्तः सभासदः नाध्यगच्छन्ननैका
न्त्यात्सहदेवस्तदाब्रवीत् १८ अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान्सात्वतां पतिः एष वै देवताः स
र्वा देशकालधनादयः १९ यदात्मकमिदं विश्वं क्रतवश्च यदात्मकाः अग्निराहुतयो म
न्त्राः सांख्ययोगाश्च यत्पराः २० राम: ॥

वर्तिते १८ अग्र्यार्हणमग्रपूजा तस्यार्हं योग्यं अनैकान्त्यात् योग्यानां बहुत्वे नैकस्य निश्चयात् १८ सां
ख्येतानेयोगाउपासना न तत्र सांख्यं केवलं परं योगः सविशेषणपराः कथ्य अभयोरेकपरात्वं तत्राह एकश्ति

याज्ञिके यज्ञोचिते वसंतादिकाले युक्तानभियुक्तान्स युधिष्ठिरः ऋत्विजो होतृप्रभृतीन्वव्रे तानाह द्वैपाय
नइति त्रिभिः ९ अथाकृतव्रणान्तानेतान्वव्रे ऋत्विग्पदेष्वादिभेदेन ४ अन्ये चोपहूताः यत्र दिदृक्षवः

शुक उवाच इत्युक्ता याज्ञिके काले वव्रे युक्तान्स ऋत्विजः कृष्णानुमोदितः पार्थो ब्राह्मणान्ब्र
ह्मवादिनः ६ द्वैपायनो भरद्वाजः सुमन्तुर्गोतमोऽसितः वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषः
त्रितः ७ विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः पैलः पराशरो गर्गो वैशंपायन एव च ८
अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः वीतिहोत्रो मधुच्छन्दा वीरसेनोऽकृतव्रणः ९ उप
हूतास्तथा चान्ये द्रोणभीष्मकृपादयः धृतराष्ट्रः सहसुतो विदुरश्च महामतिः १० ब्राह्मणाः क्षत्रि
या वैश्याः शूद्रा यत्र दिदृक्षवः तत्रेयुः सर्वराजानो राज्ञां प्रकृतयो नृप ११ ततस्ते देवयजनं ब्रा
ह्मणाः स्वर्णलाङ्गलैः कृष्ट्वा तत्र यथाम्नायं दीक्षयांचक्रिरे नृप १२ हैमाः किलोपकरणा व
रुणस्य यथा पुरा इंद्रादयो लोकपाला विरिंचिभवसंयुताः १३ सगणाः सिद्धगंधर्वा विद्या
धरमहोरगाः मुनयो यक्षरक्षांसि खगकिंनरचारणाः १४

तेन तत्र युधिष्ठिरेणान्वयः देवयजनं यज्ञभूमिं कृष्ट्वा कर्षणादिभिः संशोध्य दीक्षयांचक्रिरे दीक्षासंस्कारमकुर्व
न् उपकरणा उपस्काराः वरुणस्य राजसूये यथा सन्निति शेषः किलेंद्रादयः इति च १३ नमः ॥

हे सदस्पतयः बालस्य भाषितं मा मन्यध्वं मा जानीत न मा गृह्णीतेति किं तत्र युक्तः कृष्णोऽर्हणे मे मतः स्तान्
३१ अस्यैव वाक्यस्य वोर्थः पूर्वं वर्णयः गोपालः इति वेदशिखाद्रिपालकः नार्थः अस्ति वेदविपरीतं लयंती
ति कुलपाः तान् सते वा नयतीति तथा सः अकाकः कं च अकं च काके तेन विद्यते यस्य सः अकाकः आप्तकाम

वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः । अर्हयित्वाश्रुपूर्णाक्षो नाशकत्समवेक्षितुं २७ इ
त्थं सभाजितं वीक्ष्य सर्वे प्राञ्जलयो जनाः । नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः २८ इत्थं नि
शम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः । उत्क्षिप्य बाहुमिदमाह सदस्य
मर्षी संश्रावयन्भगवते परुषाण्यभीतः २९ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः । वृद्धा
नामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ३० यूयं पात्रविदां श्रेष्ठा मा मन्ध्वं बालभाषितं । सदसस्पत
यः सर्वे कृष्णो यत्संमतोऽर्हणे ३१ तपोविद्याव्रतधरान् ज्ञानविध्वस्तकल्मषान् । परमर्षीन्ब्रह्म
निष्ठांल्लोकपालैश्च पूजितान् ३२ सदस्पतीनतिक्रम्य गोपालः कुलपांसनः । यथा का
कः पुरोडाशं सपर्यां कथमर्हति ३३ गामः

इत्यर्थः सपर्यां मानसकामो योग्यो केवलं पुरोडाशमात्रं नार्हतीति अपि तु सर्वस्वमपि तस्यार्पणीयं श्रीकृष्णोऽपि ब्रा
ह्मणैर्योग्यो सपर्यां कथमर्हतीति किं तु आत्मसमर्पणमप्यर्हतीत्यर्थः ३३ गामः ॥

एक एवाद्वितीयोसौ अतः सोऽग्र्यः अस्यैतत्त्वं तत्त्वमुक्तं विपक्षेणाभूतस्य च सर्वप्रपंचस्य तन्मयत्वात्तद्विरोधे नाविषयस्योक्तस्यापि शुक्तौ अद्वितीयपरत्वं स्यादपैतदात्म्यमिति एष श्रीकस्यः आत्मा यस्य तत्तदेतदात्म नस्य भावः ऐतदात्म्यं भवितव्येत्यर्थं वा भावनिर्देशः ऐतदात्म्यमिदं सर्वमिति श्रुतेः अत्र हेतुः आत्मनेति हे सभ्याः आ त्माश्रयः अन्यनिरपेक्षः स्वयमजोपि जगत् सृजति अवति हन्ति चेति किंच विविधानीति २१ यस्यावेक्षयात्र

एक एवाद्वितीयोसावैतदात्म्यमिदं जगत् आत्मनात्माश्रयः सभ्याः सृजत्यवति हन्त्यजः २१ विवि धानीह कर्माणि जनयन्यदवेक्षया ईहते यदयं सर्वः श्रेयो धर्मादिलक्षणं २२ तस्मात्कृष्णाय महते दीयतां परमार्हणं २२ सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने देयं शान्ताय पूर्णाय दत्त स्यानन्त्यमिच्छता २३ इत्युक्त्वा सहदेवोभूत्तूष्णीं कृष्णानुभाववित् तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः २४ श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदं समर्हयद्धृषीकेशं प्री तः प्रणयविह्वलः २५ तत्पादाववनिज्यापः शिरसा लोकपावनीः सभार्यः सानुजामात्यः सकुटुम्बो वहन्मुदा २६ ॥

ग्रहेणाविविधानि कर्माणि तपोयोगादीनि जनयन् यदवेक्षया यस्मात् अयं सर्वोपि जनः धर्मादिलक्षणं श्रेयो हि ते साधयति कर्माणि तत्फलानि च यदधीनानीत्यर्थः २१ आत्मनां जीवानामर्हणं आत्मनः कथं भवेत्तत्राह २२ सर्वभूतात्मना आत्मभूताय अनन्यदर्शिने निमित्तभेदमतये २३ श्रीकृष्णानुभा ववित् महदेव अतः कृष्णानुमानं तूष्णीमभूत् २४ द्विजेरितं साधु साध्विति वाक्यं ज्ञात्वा हार्दं हृद्गतमभिप्रायं २

पितापि हतः तस्या हतं ज्ञात्वा यथा सिंहेन किंचिद्धतेन हतान् ३७ तावदुत्थायेत्यस्यायमभिप्रायः एष मत्पार्षदः महत्स्वबलः सर्वानेतान्हन्यात् अतो मयैव पार्षदो हन्तव्य इति तद्गुणमेवोत्थाय शिरो जहारेति ४२ नन्वेवं निंदकस्य कथं वा सदेवे प्रवेशः तत्राह जन्मत्रयेति ४४ जन्मत्रयेऽनुगुणितं अभ्यस्तं यद्वैरं तेन संरब्धयाः

एवमादीन्यसंख्यानि भावेन स्मरणेऽपालः नैवाचकिंचिद्भगवान्यथा सिंहः पिता हतः ३७ भगवन्निंदितं ज्ञात्वा तु सहते त्वमसावसद्‌ कर्णौ पिधाय निर्जग्मुः श्रोतारो वेदपारगाः ३८ निंदां भगवतः शृण्वंस्तत्परस्य जनस्य वा ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ३९ ततः पांडुसुताः क्रुद्धा मत्स्यकैकयसृंजयाः उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ४० ततश्चैद्यस्त्वसंभ्रांतो जगृहे खड्गचर्मणी भर्त्सयन्कृष्णपक्षीयान्राज्ञः सदसि भारत ४१ तावदुत्थाय भगवान्स्वान्निवार्य स्वयं रुषा शिरः क्षुरांतचक्रेण जहारापततो रिपोः ४२ शब्दः कोलाहलोऽथासीच्छिशुपाले हते महान् तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ४३ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ४४ जन्मत्रयानुगुणितवैरसंरब्धया धिया ध्यायंस्तन्मयतां यातो भावो हि भवकारणम् ४५ गमः

विष्ट्या तन्मयतां तत्स्वरूपतां यातः पार्षदो बभूवेत्यर्थः अत्र हेतुः भावो हीत्यादि भावनानुध्यानं भवस्य ध्येयस्य कारणं जन्मनः कारणं पेशस्कारीध्यानेन कीटादौ तथा दृष्टत्वादित्यर्थः ४५ ॥ गमः ॥

वर्णाश्रमकुलेभ्यः अपेतः अस्मत्त्राणायोग्य इति ज्ञाते अतएवानधिकारित्वात् सर्वैर्धर्मैर्बहिःकृतः स्वे
रवर्ती स्वात्मात्परमेश्वरत्वात् अतएव निर्गुणः तमआदिरहितः एवंभूतो जीवानां योऽपेतः स सपर्यामात्रेकल्प
मर्हतीत्यर्थः अपिच ३४ कल्पवाणीनीयो माहेयो रे घोयहनामहिमा यस्मादेषा कुलेषु यातिनापासमपि
किं सद्भिर्बहिःकृतमपि तामपि स्वापूते किंच अस्मदादिकुलवन्तिं हृणापानरतं अपि तन्निरतिशयाचारमि
त्यर्थः अहो यहनामेव तावदीदृशं माहात्म्यं तत्र जनस्य त्वयातेः पापोनप्राप्त इत्यादि श्रयेत्वस्मा.
त्तादीश्वरः अतः सपर्यामात्रेकल्पमर्हतीत्यर्थः किंच येनाजानीहि ज्ञात्रं वादयेति तेन तद्पंकीकरादिदेपानयो

वर्णाश्रमकुलापेतः सर्वधर्मबहिःकृतः सोऽपर्वाणीशसोऽहीनः सपर्यां कर्तुमर्हति ३४ ययातिनेषा
हि कुलेषामसद्भिर्बहिःकृतं तृष्णापानरतं पापं सपर्यां कर्तुमर्हति ३५ ब्रह्मर्षिसेवितान्देशा
न्हित्वेत ब्रह्मवर्चसे समुद्दिश्यागमितव्या बाधेते दस्यवः प्रजाः ३६ ॥

अयेति एतेन ब्रह्मर्षिसेवितान्देशान् वाशित्वा ब्रह्मवर्चसे समुद्दिश्य अपि हित्वा हापयित्वेत्यर्थः बाधेते तथा पापः
दस्यवः प्रजाः तास्वप्रयमर्थः ब्रह्मवेदः तदध्ययनाभियोगो ब्रह्मवर्चसं तत्सिद्ध्यर्थं ब्रह्मवर्चसे गुरावागते लिंगं
तत्त्वहिते समुद्दिश्य वेदविरुद्धलिंगधारिणो पाखण्डिन इत्यर्थः तद्विलिंगत्याजयित्वा बाधेते इत्यादि इति कल्पभूते
इयं धर्मवत्यतीतेरधर्मतया उद्गमित्यर्थः तत्पादस्पर्शनपि प्रजा वेदेषु न वर्तमानात्तदेवेयेति अत्रोऽयस्माऽन्य
को नाम धार्मिकोऽस्तीति ३६

श्री
भा॰द॰
उ॰टी॰
८२

इतिज्ञातेवनस्थाद्देवन्यपंःदुर्योधनस्यामहत्काराणातेनयागमहोत्सवमेवपुनःसिंहावलोकन्यायेननि
रूपयतिपितामहस्येत्यादिनापकदानःपुनेनत्वमनःप्राक्तनेनग्रन्थेन १ प्रेमबंधनाःप्रेमयंत्रिताः २
पूजायांसंमाननेइत्यमरायेननानावस्त्रवपादने ४ शुश्रूषणाचंदनालेपनादौ ५ निरूपितानियुक्ता

दुर्योधनेनवर्जयित्वाराजानःसर्वेयःस्मृताः इतिज्ञातेनोभयावेत्तत्वकारणाश्रुतान्ताः १ शुकतुवा
च पितामहस्यतेयज्ञेराजसूयेमहात्मनः बांधवाःपरिवेष्टायातत्स्यासन्प्रेमबंधनाः २ भीमो
महानसाध्यक्षोयमाध्यक्षःसुयोधनः सहदेवस्तुपूजायांनकुलोस्त्वसाधने ४ सताशुश्रू
षणेजिष्णुःकृष्णःपादावनेजने परिवेषणेद्रुपदजाकर्णोदानेमहामनाः ५ युयुधानोवि
कर्णश्चहार्दिक्योविदुरादयः बाह्लीकपुत्राभूर्याद्येचसंतर्दनादयः ६ निरूपितामहाय
सेनानाकर्मस्वतेतदा प्रवर्तितेस्मराजेंद्रराज्ञःप्रियचिकीर्षवः ७ ऋत्विक्सदस्यबहुवित्तमह
त्तमेष्वृष्टिपुत्रत्तसमर्हणादक्षिणाभिः चैद्येचसात्वतपतेश्चरणंप्रविष्टेचक्रुःततःस्नव
भृथस्नपनंद्युनद्यां ८ मृदंगशंखपणवधुंधुभ्यानकगोमुखाः वादित्राणिविचित्राणिनेदुरव
भृथोत्सवे ९ गामः ॥

सेतःनानाकर्मस्ववर्तितस्म ७ ऋत्विजश्चसदस्याश्चसभासदश्चबहुविदश्चतेषुविशेषेणसन्तृप्तेषुयथावा
कुसमर्हणमलंकारादिदक्षिणाश्चप्रतिज्ञाःताभिःद्युनद्योगंगायां ८ ९ ॥ ॥

83

सयामानवाःखेचराःप्रमथाश्च ५१ पापेधर्मद्विषंब्रह्मद्वेतःकलिकलेरपोश्रुतपवक्तुमुकुन्दनामयेव्याधि
नाशक ५२ इतिश्रीभावार्थदीपिकायांदशमस्कंधेचतुःसप्ततितमः ७४ पंचसप्ततितमेयत्ना

न

साधयित्वाक्रतेराजःक्रमोयोगेश्वरेश्वरः उवासकतिचिन्मासान्सुहृद्भिरभियाचितः ५७ ततो
नुज्ञाप्यराजानमनिच्छन्तमपीश्वरः ययौसभार्यःसामात्यःस्वपुरंदेवकीसुतः ५८ वर्णितंतदुपा
ख्यानंमयातेबहुविस्तरं वैकुंठवासिनोर्जन्मविप्रशापात्पुनःपुनः ५९ राजसूयावभृथ्येनस्ना
तोराजायुधिष्ठिरः ब्रह्मक्षत्रसभामध्येशुशुभेसुरराडिव ६० राज्ञासभाजिताःसर्वेसुरमानवखे
चराः कृष्णंक्रतुंचसंशंसन्तःस्वधामानिययुर्मुदा ६१ दुर्योधनमृतेपापंकलिंकुरुकुलामयं
योनसेहेश्रियंस्फीतांदृष्ट्वापाण्डुसुतस्यताम् ६२ यइदंकीर्तयेद्विष्णोःकर्मचैद्यवधादिकं रा
ज्ञामोक्षंवितानंचसर्वपापैःप्रमुच्यते ६३ इतिश्रीभागवतेदशमस्कंधेशिशुपालवधोनाम
चतुःसप्ततितमः ७४ राजोवाच अजातशत्रोस्तंदृष्ट्वाराजसूयमहोदयं सर्वेमुमुदिरे
ब्रह्मन्नृदेवायेसमागताः १ रामः ॥

वक्ष्यमाणेऽध्यायेमः सुयोधनस्यचात्यंतापमानमभिप्रेत्यहरिणाप्रमादात् दुर्योधनस्यैकस्यैवदुःखकारणंप्रसृष्टमि
त्यमत्वावदतिअजातशत्रोरिति १ ॥ रामः ॥

क्रियाभिर्वेदोनामेगक्रियाभिः कृतनाहमपारीयोगाजसूयश्व १८ पत्नीभेयाजोयागविधेयः स्व

समस्तास्त्वथमानूढः सदस्थैरेककालिने अयोध्यानगपत्नीभिः क्रियाभिः कृतवानिव १८ प
त्नीभिर्जायावभृथस्नानं विधायतेनमृत्विजः आचान्तस्तापयामास क्रमोत्तमहेतुकलया १९ दे
वर्द्धमयोनेर्द्धर्गुर्द्धविभिःसह गुरुभिः पुष्पवर्षाणि देवाः पितृमानवाः २० सस्कः
नत्राततः सर्ववर्णाश्च मयुतानगाः महापातककारियतः सद्योमुक्तोऽतिकिल्बिषात् २१ अ
श्वमेधाहृते सोमे परिधाय स्वलंकृतः ऋत्विक्सदस्यविप्रादीनानर्चाभरणादिभिः २२ वैश्य
जातिर्न्नृपान्मित्रसुहृदोन्यांश्च सर्वशः अभीतान्पूजयामास नारायणपरो नृपः २३ स
वैजनाः हारकचोमणिकुण्डलमहारत्नीयकेयूरकटिसूत्रमहार्घहाराः नार्यश्च कुण्डलयुगा
लकहैद्रक्षत्रक्राष्ठियाकनककमेखलयाविरेजुः २४ अथर्त्विजो महापालाः सद्यस्या ब्र
ह्मवादिनः ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः २५ रामः ॥

भृत्यसंबंधिस्त्राविभृत्यंचैतैः चरितस्तानवशाय यत्स्पर्धः २९ अहनेनत्रतेनैयानर्चार्चितवान् २५ रामः ॥

चित्रध्वजपताकाढ्या गीयमानैर्विमानैः स्पंदनैः अश्वैर्भद्रैः सपणवं चतुरंगैः सैन्यो निर्ययुः ९ यजमानोऽपि
शिबिकास्थः सर्वोऽप्यधात् ११ सदस्याः ऋत्विजः अन्ये च द्विजश्रेष्ठा निर्ययुः १३ किंच वाद्यादिभिः स्वलंकृता
नगनार्यश्च मिथो विजह्रुः यथा नेवाह तैलतैः किंच सांद्रकुंकुमादिभिः पुंभिर्लिप्ताः तान्प्रलिंपन्त्यो वार

नर्तक्यो ननृतुर्हृष्टा गायका यूथशो जगुः वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् ९
चित्रध्वजपताकाग्र्यैरिभेन्द्रस्यन्दनार्वभिः स्वलङ्कृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः १० य
दुसृञ्जयकाम्बोजकुरुकेकयकोशलाः कम्पयन्तो भुवं सैन्यैर्यजमानपुरःसराः ११ सदस्यर्त्विग्द्वि
जश्रेष्ठा ब्रह्मघोषेण भूयसा देवर्षिपितृगन्धर्वास्तुष्टुवुः पुष्पवर्षिणः १२ स्वलङ्कृता नरा ना
र्यो गन्धस्रग्भूषणाम्बरैः विलिम्पन्त्योऽभिषिञ्चन्त्यो विजह्रुर्विविधै रसैः १३ तैलगोरसगन्धोद
हरिद्रासान्द्रकुङ्कुमैः पुम्भिर्लिप्ताः प्रलिम्पन्त्यो विजह्रुर्वारयोषितः १४ गुप्ता नृभिर्निरगम
न्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नृदेव्यः ता मातुलेयसखिभिः परिषिच्यमानाः सव्री
डहासविकसद्वदना विरेजुः १५ ता देवरानुत सखीन्सिषिचुर्दृतीभिः क्लिन्नाम्बरा विवृतगात्रकु
चोरुमध्याः औत्सुक्यमुक्तकबराश्च्यवमानमाल्याः क्षोभं दधुर्मलधियां रुचिरैर्विहारैः १६ ॥

शोभितैर्नर्तक्यश्च ९ नृभिः रक्षणपरैर्युक्ता नृदेव्यो राजपत्न्यः निरगमन् निर्गताः एतदुपलब्धुं विमानवरै
र्देव्यो यथा तत्र मातुलेयैः सखिभिश्च परितः सिच्यमानाः सव्रीडेन हासेन विकसंति वदनानि यासां ताः
१६ देवरान्पतिभ्रातॄन् उत सखीन् सखीन्पतिसखीन् दृतीभिः उदकनोदनचर्मयंत्रैः
सुमलधियां कामिनां १७ ॥

मानी साहंकारः क्षिपन् रुषा खड्गादीनि निक्षिपयन् ३८ तत्र स्थले वस्त्रांतमभ्यग्रहणात् आकुंचितवान् कुतः
तस्मिन् स्थले पयभ्रान्त्या जलं मत्वा जले च पतत् कुतः स्थलवद्भ्रान्त्याः ३७ भुवो भारं समुज्जिहीर्षुरिति अपने
पादितेन कलहबीजेन कुरूणां संहारं करिष्यामीति मत्वा किंच यस्य दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रांतोभ्रा

श्री॰
भा॰द॰
उ॰टी॰
७५

85

आसीनः कांचने साक्षादासने मघवानिव पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वंदिभिः ३५ तत्र
दुर्योधनो मानी परीतो भ्रातृभिर्नृप किरीटमाली न्यविशदसिहस्तः क्षिपन् रुषा ३६ स्थलेभ्यग्र
ह्णाद्वस्त्रांतं जलं मत्वा जलेपतत् जले च स्थलवद्भ्रांत्या मयमाया विमोहितः ३७ जहास भीम
स्तं दृष्ट्वा स्त्रियो नृपतयो परे निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिताः ३८ स व्रीडितो वा
ग्वदनो रुषा ज्वलन्निःक्रम्य तूष्णीं प्रययौ गजाह्वयं हाहेति शब्दः सुमहानभूत्सतामजात
शत्रुर्विमना इवाभवत् ३९ बभूव तूष्णीं भगवान् भुवो भरं समुज्जिहीर्षुर्भ्रमति स्म
यद्दृशा ४० एतत्तेभिहितं राजन्यत्पृष्टोहमिह त्वया सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ
४१ इति श्रीभागवते दशमस्कंधे दुर्योधनमंगो नाम पंचसप्ततितमः ७५ ॥

पमयमायात्तनिमित्तमात्रेण भूभारहरणबीजं भीमसेनादिहास्येन च पराभवं विधाय तूष्णीमा
सीदित्यर्थः ४१ इति श्रीभावार्थे दशमस्कंधे पंचसप्ततितमः ७५ ॥

गतज्वरः निश्चिते आसीत् २० श्रुत्वैतमाम्नायस्य तस्य २१ नरेन्द्रादीनां लक्ष्मीः लक्ष्म्यो विश्वसृजा
मयेनोपक्लृप्ताः विरचिताः ताभिः कुरुराट् दुर्योधनोऽतप्यत् २२ महिषीसहस्रमिति चक्रन्वोपलक्ष

देवर्षिपितृभूतानि लोकपालाः सहानुगाः पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप १६ हरिदा
सस्य राजर्षे राजसूयमहोदयं नैवातृप्यन् प्रशंसन्तः पिबन्मर्त्योऽमृतं यथा १७ ततो युधिष्ठिरो राजा
सुहृत्सम्बन्धिबान्धवान् प्रेम्णा निवारयामास कृष्णं च त्यागकातरः १८ भगवानपि तत्राङ्ग न्यवा
त्सीत् तत्प्रियंकरः प्रस्थाप्य यदुवीरांश्च साम्बादींश्च कुशस्थलीं १९ इत्थं राजा धर्मसुतो मनोरथ
महार्णवं सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः २० एकदान्तःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं
अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः २१ यस्मिन्नरेन्द्रदितिजेन्द्रसुरेन्द्रलक्ष्मीर्नाना विभान्ति किल
विश्वसृजोपक्लृप्ताः ताभिः पतीन्द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत्
२२ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदङ्घ्रिशोभं मध्ये सुचारु कुचकुङ्कुम
शोणहारं श्रीमन्मुखं प्रचलकुण्डलकुन्तलाढ्यं २३ सभायां मयक्लृप्तायां क्वापि धर्मसुतोऽधिराट् वृ
तोऽनुजैर्बन्धुभिश्च कृष्णेनापि स्वचक्षुषा २४ ग्राम ॥

शोणाङ्घ्रिः श्रोणिभिः शोभायस्य मध्ये सुचारु कुचयोरिति पर्णः शोणहारं यस्य तत्तथा लोलैः कुण्डलैः कुन्तलैश्चाढ्यं
मेघवृन्दं शोभते इति शेषः २३ क्वापि कस्मिंश्चित् सिंहासने अधिराट् सम्राट् वृतः इत्यादि सहितः कृष्णेन २४ ॥

प्रासादाः गृहाः अट्टालाः तदुपरिगृहाः तोलिकाः तदुपर्यन्तकृतानिताः विहाराः क्रीडास्थानानि च सर्वं बभंज किंच ९ तस्मात् विमानाग्र्यात् पाकेयाधारासंपातवज्रोपलाः ११ नैशं निशिभवं तमः

निरुध्य सेनया शाल्वो महत्या भरतर्षभ पुरीं बभंजोपवनान्युद्यानानि च सर्वशः ९ सगोपुराणि द्वाराणि प्रासादाट्टालतोलिकाः विहारान्स विमानाग्र्यान्निपेतुः शस्त्रवृष्टयः १० शिलाद्रुमाश्चाशनयः सर्पा आसारशर्कराः प्रचंडश्चक्रवातोऽभूद्रजसाच्छादिता दिशः ११ इत्यर्द्यमाना सौभेन कृष्णस्य नगरी भृशं नाभ्यपद्यत शं राजंस्त्रिपुरेण यथा मही १२ प्रद्युम्नो भगवान्वीक्ष्य बाध्यमाना निजाः प्रजाः माभैष्टेत्यभ्यधाद्वीरो रथारूढो महायशाः १३ सात्यकिश्चारुदेष्णश्च सांबोऽक्रूरः सहानुजः हार्दिक्यो भानुविंदश्च गदश्च शुकसारणौ १४ अपरे च महेष्वासा रथयूथपयूथपाः निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः १५ ततः प्रववृते युद्धं शाल्वानां यदुभिः सह यथासुराणां विबुधैस्तुमुलं रोमहर्षणं १६ तांश्च सौभपतेर्माया दिव्यास्त्रै रुक्मिणीसुतः क्षणेन नाशयामास नैशं तम इवोष्णगुः १७ विव्याध पंचविंशत्या स्वर्णपुंखैरयोमुखैः शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः १८ रामः ॥

उष्णगुः सूर्यः स्व किंच विव्याधेत्याह १७ स्वर्णपुंखानि पुंखानि पृष्ठप्रान्तानि येषां तैः अयो लोहं तन्मयान्यग्राणि येषां तैः १८ रामः ॥

ततः षट्सप्ततितमे ह्यस्मिन् शाल्ववधाभिधे युद्धं कृत्वा प्रद्योरणारणान्प्रद्युम्ननिर्गमः सोपाख्य धर्मराजस्य राजसूयमहोदये निहत्य सौभराजादीन् योपारमद्च्युतः आशुतोषोपि भगवानुमापतिः श्रीकृष्णविद्वेषिमाल्ववरस्यवै फल्यमन्यमनोनपीत्रशाद्भुतस्यातिनिर्बंधमालेत्यमेवकमरोतेनवरेणाच्छंदयामा

श्रीशुक उवाच । अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप । क्रीडानरशरीरस्य यथा सौभपतिर्हतः १ शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः । यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा २ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजां । अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत ३ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं । आराधयामास नृपः पांशुमुष्टिं सकृद्ग्रसन् ४ संवत्सरान्ते भगवानाशुतोष उमापतिः । वरेण च्छन्दयामास शाल्वं शरणमागतं ५ देवासुरमनुष्याणां गंधर्वोरगरक्षसां । अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणं ६ तथेति गिरिशादिष्टो मयः परपुरंजयः । पुरं निर्माय शाल्वाय प्रादात्सौभमयस्मयं ७ स लब्ध्वा कामगं यानं तमोधाम दुरासदम् । ययौ द्वारवतीं शाल्वो वैरं वृष्णिकृतं स्मरन् ८ ग्रमः ॥

सरवांकारितवान्पचासंशाणीवत्सवाच ५ तथेतिप्रतिज्ञायगिरिशेनादिष्टः अयस्मयं लोहमयं सौभसंज्ञं तेनि र्मायवचयित्वाप्रादात् ७ तमसौधकारस्यधामाश्रयं यत्तथोत्र्यपदेर्रासदंः आपे ८ ग्रमः ॥

श्री
भा० द०
उ० टी०
८१

मौर्व्याकार्मुकमत्र मद्यात्मवद्याहत गदया व्याहतस्य २६ अपोवाह रणात् प्रद्युम्नं नीतिनिवाय २७ मन।
मनोविना क्लीबचित्तप्रयुक्तेन त्वया सूतेन २९ पितरौ रामकृष्णावभिसङ्गम्य तत्पार्श्वं गतस्त्वं तत्र पृष्टः
त्वयो किं वक्ष्यामीति ३० भ्रातृजामयो भ्रातृभार्याः निश्चितं मे क्लैब्यं कथयिष्यन्ति तत्कथं मत्कमिति

सात्वा माम्यो युद्धमात्रामप्रद्युम्नो शाक्यपीडितः आसाद्य गदया मौर्व्या व्याहतस्य नन्दस्थली २६
प्रद्युम्नं गदया शीर्णवक्षःस्थलमरिन्दम अपोवाह रणात् सूतो धर्मविद् दारुकात्मजः २७ लब्ध
संज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् अहो असाध्विदं सूत यद् रणान्मेऽपसर्पणम् २८ न यदू
नां कुले जातः श्रूयते रणविच्युतः विना मत्क्लीबचित्तेन सूतेन प्राप्तकिल्बिषात् २९ किं
नु वक्ष्येऽभिसङ्गम्य पितरौ रामकेशवौ युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमम् ३० व्यक्तं
मे कथयिष्यन्ति हसन्त्यो भ्रातृजामयः क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ३१ सार
थिरुवाच धर्मं विजानतायुष्मन् कृतमेतन्मया विभो सूतः कृच्छ्रगतं रक्षेद् रथिनं सारथिं रथी
३२ एतद्विदित्वा तु भवान् मयापोवाहितो रणात् उपसृष्टः परेणेति मूर्च्छितो गदया ह
तः ३३ ॥

कथं कथयामीति ३१ हे विभो समर्थ एवं तद्धर्मप्रणयधर्ममाह सूत इति ३२ अपोवाहितः रणादप
नीतः उपसृष्टः उपसर्गपीडाप्राप्तः इति कृत्वा यतः परेण शत्रुणा गदया हतः सन् मूर्च्छि
तो निःसत्त्वतो भवानिति ३३ रामः ॥

सैनिकान्महाबलेनहन्तसारथीन् १४ स्वपराक्रमेणयोर्वर्तमानाः सर्वेसृजयामासुःसेमानितावंतः १५ कदाचि
त्वबहुरूपकदाचिदेकरूपक्वचित्दृश्यतेक्वचित्नदृश्यतेएवंदैत्यविभाव्यप्रवितर्कामरूजकिंचक्वचिदिति १६
एवंतद्रथवस्थितंप्रनवस्थितंवाम्बुजा १७ अग्निवद्दाहकःसूर्यवद्गगणान्मर्त्तःसैस्यपौत्रोयेषांतेःमापीविष

पातैनानायुधयुक्त्साल्वमेकैकनास्यसैनिकान् दशभिर्दशभिर्नैतन्वाहननानित्रिभिस्त्रिभिः १८ त
दद्भुतमहत्कर्मप्रद्युम्नस्यमहात्मनः तेदृष्ट्वापूजयामासुःसर्वेस्वपरसैनिकाः १९ बहुरूपैकरूपंत
दृश्यतेनचदृश्यते मायामयेनयत्कृतंदविभाव्यतेरिपुभ्यः २० क्वचिद्भूमौक्वचिद्व्योम्निगिरिमूर्द्धज
लेक्वचित् सल्यातवक्रवद्रास्यतेमिभेतःस्वस्थित २१ ग्रह्यतेचापल्तेतस्मौभद्रसैनिकः
साल्वस्तत्ततोमुंचकमानसाततमूर्ष्मपः २२ पतेत्याकैसैस्यपौत्रापीविषवदासदैः पीडमा
नपरानीकःसाल्वोमुहाप्यैरिति २३ साल्वानीकपचात्मैतैरैसशिवीराश्रपार्दितः नतत्यज
रणंसस्वेलोकद्वयजिगीषवः २४ रामः ॥

वदैकदेपास्यपौत्रमार्गेणमारकन्याजुरयाप्रदेहुः मोहेः पीडमानंदृष्ट्वानीकानिचयस्यसःपरैर्वरभिःवीतैर्
नैः २४ भूपार्दितासपिनस्वेरणत्याक्तापुरमभिनान्पजः २५ ॥ रामः

तेन त्वया १० आस्थायेत्यस्य प्रहाय ग्रहणानुजे गरुडध्वजे वर्तमाने ११ हतप्रायस्य बलस्येश्वरः १२
तं च शाल्वं शरसंदोहैः शरजालैः स्वं सूर्य इव रश्मिभिः स्वकीयरश्मिभिः मलीमसत्वादिभिः आकाशमिव सौभमाच्छादित्य
वेगवत्त्वाद्बहुत्वादिभिर्गुणैः रश्मिसादृश्यं प्रयत्नेनैव रश्मिवत् शरजालप्रसारणात् सूर्यतुल्यः १

रणे प्राप यमेऽहत्तं शाल्वस्यानीकमाशु वै । संभ्रमस्तेन कर्तव्यो मायावी सौभराडयं १० कृष्णः
चोदयामास रथमाश्वथ दारुकः । विपन्नं दृष्ट्वा सर्वे स्वपरे वासुदेवानुजं ११ शाल्वश्च
कृष्णमालोक्य हतप्रायबलेश्वरः । प्राहरत्कृष्णसूताय शक्तिं भीमरवां मृधे १२ तामा
पतन्तीं नभसि महोल्कामिव रंहसा । भासयन्तीं दिशः शौरिः सायकैः शतधाच्छिनत् १३
तं च षोडशभिर्विद्ध्वा बाणैः सौभं च सम्भ्रमत् । अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः १४
शाल्वः शौरेस्तु दोः सव्यं सशार्ङ्गं शार्ङ्गधन्वनः । बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतं
१५ हाहाकारो महानासीद्भूतानां तत्र पश्यतां । विनद्य सौभराडुच्चैरिदमाह जनार्दनं
१६ यत्त्वया मूढ नः सख्युर्भ्रातुर्भार्या हृतेक्षतां । प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा १७ तं
त्वाद्य निशितैर्बाणैरपराजितमानिनं । नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः १८ श्रीभगवानुवाच
वृथा त्वं कत्थसे मन्द न पश्यस्यन्तिकेऽन्तकं । पौरुषं दर्शयन्ति स्म शूरा न बहुभाषिणः १९ ॥

श्रीकृष्णस्येति १४ दोर्बाहुं १५ सख्युः शिशुपालस्य ईक्षतां वीक्षतां अस्माकं प्रमत्तः अनवहितः व्यापादितो नि
हतः १६ अपराजितोऽहमिति मानवन्तं अपुनरावृत्तिं मृत्युं निष्ठेः स्थास्यसि १९ ॥

इति श्रीभावार्थदीपिकायां दशमस्कन्धे षट्सप्ततितमः ७६ सप्तसप्ततितमे नानामायाविचक्षणः कृ
ष्णेनागत्य शाल्वस्तु हतः सौभं च चूर्णितं दंशितः सन्नद्धः १ विधमंतं द्रावयंतं प्रत्यहत्य प्रतिरुध्य [illegible]
[illegible] ३ सौभेयाः सौभस्थाः ४ त्रिनवरात्रं सप्तविंशति रात्रीः [illegible]

इति श्रीभागवते दशमस्कन्धे षट्सप्ततितमः ७६ शुक उवाच स उपस्पृश्य सलिलं दंशितो धृतका
र्मुकः नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिं १ विधमन्तं स्वसैन्यानि द्युमन्तं रुक्मिणीसुतः प्रति
हत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् २ चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत् द्वाभ्यां धनुश्च
केतुं च शरेणान्येन वै शिरः ३ गदसात्यकिसांबाद्या जघ्नुः सौभपतेर्बलं पेतुः समुद्रे सौभेयाः
सर्वे संछिन्नकंधराः ४ एवं यदूनां शाल्वानां निघ्नतामितरेतरं युद्धं त्रिनवरात्रं तदभूत्तुमुलमु
ल्बणं ५ शुक उवाच इंद्रप्रस्थं गतः कृष्ण आहूतो धर्मसूनुना राजसूयेऽथ निवृत्ते शिशुपाले
च संस्थिते ६ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां निमित्तान्यतिघोराणि पश्यन्द्वारवतीं य
यौ ७ आह चाहमिहायात आर्यमिश्राभिसंगतः राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ८
वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणं सौभं च शाल्वराजं च दारुकं प्राह केशवः ९ ॥

[illegible] इत्यादि ५ आह चेति [illegible]
[illegible] ८ [illegible]
[illegible] प्रति निरूप्य निरूप्य दारुकं प्राह

॥ ५ ॥

केवलान्विताः पूर्वापरानुसंधानरहिताः तदाह यत्त्वयावश्यं तितत्राप्नुमस्मेरोतीत्यर्थः अयमभिप्रायः नत्तावद्य
जमृष्यार्थंसङ्ग्रामेणागतः श्रीकृष्णः सेकर्णेणमनस्ताप्येति पूर्वं श्रुतात्प्रसंभाविनेवेत्याहक्कचोकमोहा
विति २९ भयेवाहनिमित्तदर्शनेष्वासनेन हन्युःपुरीममेतियडंकयन्वन्नलान्तुधाईन्यपतदितिउक्तेतहृय
वाकेतिअतेषुसंभवोयथोत्तेअवेडितानिविज्ञानेश्वर्याणियस्यसः तत्रविज्ञानस्वरूपविषयज्ञानबाह्यवि

एवंवदतिराजर्षेऋषयःकेवलान्विताः यत्त्वयावोचिविप्राग्र्यश्रुतंतेनमयांश्रुतं २९ कच्चित्कमो
होऽसहोवामर्यवायेत्तसेमवाः कच्चाल्वेडितविज्ञानज्ञानेश्वर्यस्मरोऽडितः ३० यत्पादसेवोर्जित
यात्मविद्ययाहिन्वेतिनाद्यात्मविपर्ययग्रहं लभेतआत्मीयमनेनमैस्वक्कतोतुमोहःपर
मस्यसङ्कृतेः ३१ तेषामहम्पदोःप्रहर्तमोजसामाल्पेधातेऽष्योदिरमोमाविक्रमः विद्याक्विनव
मेयत्रःपिरामणिसोमंचपात्रोर्पादयाहरोजमः ३२ रामः ॥

षयोकिंच ३० यस्यपादसेवयाऊर्जितापुष्कलायात्मविद्यात्तयाअनादिस्थासौआत्मविपर्ययग्रहश्चअहं
कर्तास्वसर्वज्ञःस्वीइत्यादिलक्षणःनाहिन्वेतिनाशयतिसतःपुष्करपदेवत्तस्यमत्तांमताऊतोतुमोहइति
अतोनैतद्वचनंसत्यमित्यर्थः किंतर्हिसत्यंतदाहतेषामहम्पदोमिति ३१ वर्मकवचंकरोजवमजहजोभेरो

देवक्याप्रहितोस्मीति २१ हृष्टीदयावान् २२ जनिताजनयितार्हपाःचेतणाक्तःचेत् २४ २६ स्वबोधतः

इत्युक्त्वाभगवान्सात्वेगदयामीमवेगया ततोऽजनोमेरुःसवकेपेवमननक १९ गदायांस
त्रिहृतायोसाल्वस्वेतप्रधीयत ततोमुहूर्तेंगावात्प्रकृपःपिरसाच्युत २० देवक्याप्रहितोस्मीति
नत्वाप्राहवचोनदन २१ कामकामहावाहोपितानपितवत्सल वद्धोपनीतःसाल्वेनसोति
केनयथापशुः २२ नितान्तविप्रियंकामोमातृवीप्रकृतिगतः विमनस्कोहाक्तिस्वहारुमाधे
प्राक्रतोयथा २३ कथंरामंसमंजातजित्वाजेयमसुरासुरैः साल्वेनाल्पीयसानीतःपितामेव
लवान्विधिः २३ इतिब्रुवाणेगोविंदेसौभराट्प्रत्युपस्थितः वसुदेवमिवानीयकृष्णचेदमुवाच
सः २४ एषतेजनितातातोयद्यर्थमिहजीवसि वधिष्येवीक्षतःतेमुनीपाःचेत्पाहिवालिपा
२५ एवंनिर्भर्त्स्यमायावीखड्गेनानकदुंदुभेः उत्कृत्यशिरआदायस्वस्थोसौमसमविपात २६
ततोमुहूर्तंप्रकृतात्वुधस्तःस्वबोधआस्तेस्वजनानुभावतः महानुभावःतदवुध्यदासुरीमायां
मसाल्वप्रसृतांमयोदितां २७ नतत्रदूतंनपितुःकलेवरंप्रबुद्धआजौसमपश्यदच्युतः स्वाप्ने
यथाचांबरचारिणंरिपुंसौभस्थमालोक्यनिहंतुमुद्यतः २८ ॥

स्वतोज्ञानवानपिस्वजनस्नेहतःमानुष्यस्वभावेनमुह्यतोगिमुहूर्तआस्तेइतिनततःमहर्षयःआसुरीमाया
मेवयमतमायेयमितिज्ञातवान् २९ स्वामस्वमप्रपंचंयथापएवेपरमतत्त्वुपन्यस्तेनिरा
करोतिएवमिति ३० ॥

श्री
भा॰ द॰
उ॰ टी॰
५॰

अतिहर्षं वीक्ष्यापीतः पुन्ये किंवदेकस्मात्वमस्माकं मातलेयो बंधुः एवमपि मित्रकुलमित्राणि जातितवान्स्मो
वजितोस्मि तस्मादस्माकं नृणां मृत्युः सनकाद्यनुग्रहप्रभावान्नेदृशाः अतस्त्वमेतावन्मात्रं नयं याचे किं त
दाह हे अमंद सर्वेषां हननसमर्थं त्रयमेणाग्रामे वित्तं गदया तां हनिष्ये अहं पिष्यामि तामेकवारमहं स्वतिनत्व
वज्रतुल्यां त्वद्गदां कावा महे तन्नेव भिन्ना अहं अवज्ञकल्पया उत्पलमालावदिति कोमलया इत्यर्थः न त्वेवं ह

१०

ततश्चायोत्समालोक्य गदामादाय सत्वरः । अवस्तुन्यर्थं कुत्समभिद्वेलेयप्रत्ययात् ३ गदाग्र
यमस्कानूबो गुरुदंष्ट्राहङ्कमेदः । दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ४ त्वं मातलेयतः
कस्मः मित्रभ्रूणो जितोस्मि । अतस्त्वां गदयामद्य हनिष्ये वज्रकल्पया ५ तर्हि त्वन्नृपघ्नपे
म्यतामित्राणां मित्रवत्सलः । बंधुरूपमरिं हत्वाभ्यापि हवेयथा ६ रामः ॥

हन्तैकः त्वं पुरुषार्थः तमाह तर्हीति ५ अत्र न विद्यते ज्ञो यस्मात् हे सर्वज्ञ इत्यर्थः परमार्थतः स्वामिन
मेतद्देहमेवं पुरूपेण ब्रह्मणा पापेन ब्रह्म सनकादि पापेन बन्धुत्वेन प्रतीतं त्वां हत्वा मित्राणामानृण्यं उपेष्यामि
विपक्षाणां भीयते मनसा चिन्त्यते इति व्याधिः देहे तद्यो मित्रयाचरतीति तथा नमीश्वरः हत्वा त्वा त्रयमेणाग्य
हेतोर्गत्यर्थस्य ज्ञानार्थत्वात् ज्ञात्वेति वा तेन यथा पित्रादीनां आनृण्यं उपयाति तद्वत् ६ रामः ॥

५॰

लयार्कसन्निभं प्रलयकालीनसूर्यसन्निभं ३४ देववीतेर्वीरिताः किंचसावीनामिति ३६ इतिश्रीभावार्थदी-
पिकायांदशमस्कंधेसप्तसप्ततितमः ७७ ततोष्टसप्ततितमेदंतवक्रविदूरथौ हत्वाहरिःपुरेरेमेरामःसू-
तंततोवधीत् सावीनामपचितिऊर्वंशित्रुजतंदेवाक्रशिशुपालस्येतिपारोक्ष्यसौहृदंपौत्रकरणीयं

तत्कृष्णहस्तेरितयाविचूर्णितंसौभंततोयेवाद्यामहस्तथा विमृत्युपतद्वत्तत्समास्थितोगदाप्रध-
मृतासोत्वोघत्तमभ्यागाद्वत्तन् ३३ आधावतःसगदंतस्यबाहुंभल्लेनछित्वायरणोगमद्भुतं वधा-
यसाल्वस्यलयार्कसन्निभंबिभ्रद्भोभाकंरवोदयाचलः ३४ जहारतेनैवशिरःसकुंडलंकिरीट-
जुष्टंपुरमायिनोरिपुः वज्रेणवृत्रस्ययथापुरंदरोबभूवहाहेतिवचस्तदानृणां ३५ तस्मिन्-
निपतितेपापेसौभेचगदयाहते नेदुर्दुंदुभयोराजन्दिविदेवगणेरिताः ३६ सावीनामपचिति-
ऊर्वंदंतवक्रोरुषाभ्यगात् ३७ इतिश्रीभावार्थदीपिकायांदशमस्कंधेसप्तसप्ततितमः ७७
शुकउवाच शिशुपालस्यसाल्वस्यपौंड्रकस्यापिदुर्मतिः परलोकगतानांचकुर्वन्पारोक्ष्यसौ-
हृदं १ एकःपदातिःसंक्रुद्धोगदापाणिःप्रकंपयन् पद्भ्यामिमांमहाराजमहासत्वोव्यदृश्यत २

सौहृदंसख्यं १ प्रत्यपातप्रतिरुरोध २ मकुंदस्यग्रत्मंबावादयाविदेयितिपरत्वासकौदेवपरमार्थंतत् [illegible] दुर्मदः
गतमदःप्राहमुकुंदंमत्तोयेजन्मनिमत्किंदानार्थमागतंमयेतिजन्मत्रयेत्वनिष्ठमागोयत्रसपापाव-
सानेभवान्मत्सामीहत्पिपणंगतः [illegible] प्रणादिष्टा २ ॥

सुदर्शनं तीर्थं चक्रतीर्थं १९ यमुनामनु यानि तीर्थानि गङ्गामनु यानि तानि सर्वाणि गत्वा नैमिषारण्यं ज
गाम २० अभिप्रेत्य श्रीरामं प्रतिज्ञात्वा महर्षेः व्यासदेवस्य २२ सूतजातिं प्रतिलोमजं न कृतं प्रह्वणं नमनं अञ्जलि
श्च येन तं अध्यासीनं च तान् तेभ्योऽप्युच्चैरासीनमित्यर्थः २३ अज्ञानमध्यास्ते इति चेत्तत्राह ऋषेरिति २४

पृथूदकं बिन्दुसरस्त्रितकूपं सुदर्शनं विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीं १९ यमुनामनु
यान्येव गङ्गामनु च भारत जगाम नैमिषं यत्र ऋषयः सत्रमासते २० तमागतमभिप्रेत्य मुना
यो दीर्घसत्रिणः अभिनन्द्य यथान्यायं प्रणम्योत्थाय चार्चयन् २१ सोऽर्चितः सपरीवारः कृता
सनपरिग्रहः रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत २२ अप्रत्युत्थायिनं सूतमकृतप्रह्वणा
ञ्जलिं अध्यासीनं च तान् विप्रांश्चुकोपोद्वीक्ष्य माधवः २३ कस्मादसाविमान् विप्रानध्यास्ते प्रति
लोमजः धर्मपालांस्तथैवास्मान् वधमर्हति दुर्मतिः २४ ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य बहू
नि च सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः २५ अदान्तस्याविनीतस्य वृथा पण्डितमानि
नः न गुणाय भवन्ति स्म नटस्येवाजितात्मनः २६ एतदर्थो हि लोकेऽस्मिन्नवतारो मया कृतः
वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः २७ रामः ॥

ननु बहुज्ञः कथमेवं कुर्यात्तत्राह २५ गुणाय यथोचितानुष्ठानाय विप्रानयात्वामन्यदा किं चिकित्सितो न
किं न वेति चेत्तत्राह एतदर्थो इति २६ धर्मध्वजिनः उत्तमलिङ्गधारिणः २७ ॥ रामः

हृष्टैरित्यादिशतीत्यभिप्रायेणाज्ञो रेकुपादिभिः ३ एवं श्रीकृष्णो महाबलानपि लीलया जयत्येवेतिक
एवं कृतेस्तदा वार्केः कृष्णेनोरेविहिपे गदयानाङ्ग्यन्यैर्भिर्भिर्हिवद्धानदच्चमः ७ गदयाभि
हितोप्याजौनचचालयरहृहः कृष्णापित्तमहन्मुख्यांकोमोदक्यास्तनीतरे ८ गदानिभिन्नहृद
यउद्धमनकृधिरं श्रावात् प्रसार्यकेपावाङ्कीन्यपणान्यपतद्भुमः ९ ततः सहस्रनेत्रज्योतिःकृ
ष्णमाविशदद्भुते एषपनामदंभूतानोयपावेयवयेन्नप १० विद्रवत्स्तनद्भातात्रान्तृपोकपरि
स्नतः श्रागच्छदसिचर्मभ्यां कृष्णं सन्नाजिवामया नरूपयापततः कृष्णश्चक्रेणास्त्रनेमि
ना पिरोजहारयाजेद्रुसकिरीटं सकुण्डलं ११ एवं सोभेचशाल्वचदंतवक्रसहानुजे ह
त्वाउर्विषहानन्यैरीडितः स्तूयमानवैः १२ मुनिभिः सिद्धगंधर्वैर्विद्याधरमहोरगैः अप्सरो
भिः पितृगणैर्यक्षैः किन्नरचारणैः १३ उपगीयमानविजयः कुसुमैरभिवर्षितः वृतश्च वृ
ष्णिप्रवरैर्विवेशालंकृतां पुरीं १४ एवं योगेश्वरः कृष्णो भगवान् जगदीश्वरः ईयते पशुह
ष्टीनां निर्जितो जयतीति सः १५ विद्रूपणात्तमातिष्णुहतनादि दनोःकुले कृष्णस्तपारम
ङ्गाराद मोहन्तनबल्लवो १७ कन्तागुर्देवायमेरामकुहणामहपाण्डवैः तीर्थाभिषेकव्या
जेन मध्यस्थः प्रययौ किल १८ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान् सरस्वतीं प्रति
स्रोतं ययौ ब्राह्मणसंवृतः ॥ १९

त्वामकदाविजयासंख्यादिभिर्निर्जितः इतिपशुहष्टीनामीयते २६ नग्नसेनामाहत्क्वचेति २७ प्रतिस्रो
तःप्रतिलोमं २८ ॥ ॥

अस्मादीनां मायतना यथा भवेत्तत्तथा विधीयतामित्यर्थः संपादयन्नाह आत्मावा इति ३५ अंगादंगात्संभवसिह
हृदयादभिजायसे आत्मावै पुत्रनामासि स जीव शरदां शतमित्यादि वेदानुशासनं वेदवचनेनास्मादस्यामह
र्षेणास्य पुत्रः उत्पन्नो भवेत्तात्र स्त्रीणां पुत्राणां प्रवक्ता भवेत्सदापुत्रादिमांश्च भवेत् अतः स्मात्तादजीवनादस्मस्य
मृत्योस्त्रासमायतान पुत्र रूपेण वा पुत्रादिसिद्धः युष्मद्वचनस्यापि मायतास्मादिति भावः प्रथमं तावदपेतितेके

ऋषय ऊचुः अस्माकं पतत्तीर्थस्य मात्योरस्माकमेव च यथा ब्रवीतु वः सत्यं तथा श्रामविधीयतां
३५ श्रीभगवानुवाच आत्मा वै पुत्र इत्यन्नं श्रुतिवेदानुशासनं तस्मादस्य भवेत्तत्रापुत्रादिरिय
मत्ववान् ३६ किं वः कामोस्ति निश्चयाद्ब्रूताहं करवाणि च अस्मानतः स्वपचितिं यथामे विन्य
तां तथा ३७ ऋषय ऊचुः इल्वलस्य हतो ह्यासीद्वल्वलो नाम दानवः सहर्षयतिनः सत्रं पत्यप
र्वणि पर्वणि ३८ तेषां पंजहि दायाहं तत्रः शुश्रूषणोपरं रूपयोणितविग्रहसत्रामांसामिव
र्त्तिणं ३९ ततश्च भारतवर्षपरीत्य समसमाहितः चरित्वा द्वादशमासांस्तीर्थस्नायी विशुद्ध
से ध· ॥

यतात इहं करिष्यामीत्याह किं वा काम इति ३६ किं विषयो वः कामो वर्तते तद्रूतिश्चयान्तं तं ब्रूत दृष्टुं
हीत्वा अपचितिं निष्कृतिं अजानतो मेहे बुधाः यथावच्चिन्तयतां मम विचितिरिति प्रथमं तावदपेतितं कोत्र
कथयतिइल्वलस्येति ३७ प्रायश्चित्तमाहुः ततश्चेति ३९ परीत्य प्रदक्षिणीकृत्वा संसमावितिपोषः समस
स्तना दिग्गुणा विपाषादे कार्ह माजः श्रन्नामित्याविशेषः स समसमाहितः कामक्रोधादिरहितः चरित्वा कृत्वा

भावित्वादिति न हि भवितव्यं केनापि परिहर्तुं पार्यत इत्यर्थः अहन् अहनत् २८ तेन त्वया अधार्मिकः प्रतिलोमजवधः कोऽयमधर्मः कृत इति चेन्नाऽऽह अस्येति २९ पुराणवाचनाय आत्मनः शरीरस्य नास्ति क्लमो यस्मिंस्तदा युस्तद्दत्तमिति ३० ब्रह्मवधेऽपि किं मम योगेश्वरस्येति चेत्तत्राहु यद्येवं तथापि प्रायश्चित्तं कर्तव्यमेवेत्याशयेनाहुः योगेश्वरस्येति सार्धेन आम्नायो आज्ञा न हि नियमन्यत्यादिलक्षणाः ३१ तथापि एतस्या ब्रह्महत्यायाः पावनं प्रा

एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः २८ हाहेतिवादिनः सर्वे मुनयः खिन्नमानसाः ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो २९ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनन्दन आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते ३० अजानतैवाचरितस्त्वया ब्रह्मवधो यथा योगेश्वरस्य भवतो नाम्नायोऽपि नियामकः ३१ यद्येतद्ब्रह्महत्यायाः पावनं लोकपावन चरिष्यति भवाँल्लोकसंग्रहोऽनन्यचोदितः ३२ श्रीभगवानुवाच करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया नियमः प्रथमे कल्पे यावान्स तु विधीयताम् ३३ दीर्घमायुर्बतैतस्य सत्त्वमिन्द्रियमेव च आशासितं यत्तद्ब्रूत साधये योगमायया ३४ [illegible] ॥

यश्चित्तं हे लोकपावन अनन्यचोदितः स्वयमेव भवान्यदि करिष्यति तर्हि लोकसंग्रहो भविष्यति नान्यथेति ३२ वधस्य निर्वेशं प्रायश्चित्तं प्रथमे कल्पे मुख्यकल्पे विधीयतां उपदिश्यतां किं च ३३ बत हे मुनयः एतस्य दीर्घमायुः सत्त्वं बलं इन्द्रियं तस्य पाटवं अन्यच्च यद्भवद्भिराशासितं अपेक्षितं तत्सर्वं ब्रूत ३४ ॥

93

गोमत्यां गंडक्यां विपाशायां च स्नात्वा इष्ट्वा संपूज्य ११ श्रीशैले श्रीपर्वते १३ कांचीपुरीं १४ सामुद्रं

गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः गयां गत्वा पितॄनिष्ट्वा गंगासागरसंगमे ११ उप
स्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य च सप्तगोदावरीं वेणां पंपां भीमरथीं ततः १२ स्कंदं दृष्ट्वा ययौ
रामः श्रीशैलं गिरिशालयं द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः १३ ऋषभाद्रिं हरेः क्षेत्रं द
क्षिणां मथुरां तथा सामुद्रं सेतुमगमन्महापातकनाशनं १४ कामकोष्णीं पुरीं कांचीं का
वेरीं च सरिद्वरां श्रीरंगाख्यं महापुण्यं यत्र संनिहितो हरिः १५ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो
हलायुधः कृतमालां ताम्रपर्णीं मलयं च कुलाचलं १६ तत्रागस्त्यं समासीनं नमस्कृत्या
भिवाद्य च योजितस्तेन चाशीर्भिरनुज्ञातो गतोर्णवं १७ दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः
ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं १८ विष्णुः संनिहितो यत्र स्नात्वास्पर्शद्गवायुतं ततोभि
व्रज्य भगवान्केरलांस्तु त्रिगर्तकान् गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः आर्यां द्वैपा
यनीं दृष्ट्वा शूर्पारकमगाद्बलः २० तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकं प्रविश्य रेवामग
मद्यत्र माहिष्मती पुरी २१ मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत् २२ श्रुत्वा द्विजैः कथ्यमा
नं कुरुपांडवसंयुगे २३ सर्वराजन्यनिधनं भारं मेने हृतं भुवः स भीमदुर्योधनयोर्गदाभ्यां यु
ध्यतोर्मृधे वारयिष्यन्विनशनं जगाम यदुपुंगवः २४ ॥

दक्षिणमर्णवं १७ फाल्गुनं अनंतपुरं पंचाप्सरसं सरः १८ अस्पर्शात् अस्पृशत् केरलादीन् देशान्
१९ द्वीपमयनं यस्याः सा २० विनशनं कुरुक्षेत्रे २४ ॥

इतिश्रीभावार्थदीपिकायामष्टसप्ततितमः ७८ ऊर्ध्वपीतितमेरामोबल्वलेनिजमेवये निहत्यतीर्थस्नाना
र्थैःसूतहत्यामपानुदत् उपाहृतेमासे १ भिन्नोविदीर्णःक्षोजनचयउपमायस्यतंदंष्ट्रामिहग्रंथकृतीय

इतिश्रीदशमेस्कंधेबल्वलवधेबलदेवतीर्थयात्रायामष्टसप्ततितमः ७८ शुकउवाच ततःपर्वण्यु
पावृत्तेप्रचंडःपांसुवर्षणः भीमोवायुरभूद्राजन्पूयगंधस्तुसर्वशः ततोऽमेध्यमयंवर्षंबल्व
लेनविनिर्मितं अभवद्यज्ञशालायांसोन्वदृश्यतशूलधृक् २ तंविलोक्यबृहत्कायंभिन्नांज
नचयोपमं तप्तताम्रशिखाश्मश्रुंदंष्ट्रोग्रभ्रुकुटीमुखं ३ सस्मारमुसलंरामःपरसैन्य
विदारणं हलंचदैत्यदमनंतेतूर्णमुपतस्थतुः ४ तमाकृष्यहलाग्रेणबल्वलंगगने
चरं मुसलेनाहनत्क्रुद्धोमूर्ध्निब्रह्मद्रुहंबलः ५ सोपतद्भुविनिर्भिन्नललाटोऽसृक्समु
त्सृजन् मुंचन्नार्तस्वरंशैलोयथावज्रहतोऽरुणः ६ संस्तुत्यमुनयोरामंप्रयुज्यावितथा
शिषः अभ्यषिंचन्महाभागावृत्रघ्नंविबुधायथा ७ वैजयंतींददुर्मालांश्रीधामाम्लान
पंकजां रामायवाससीदिव्येदिव्यान्याभरणानिच ८ अथतैरभ्यनुज्ञातःकौशिकीमेत्य
ब्राह्मणैः स्नात्वासरोवरमगाद्यतःसरयूरास्रवत् ९ अनुस्रोतेनसरयूंप्रयागमुपगम्यसः
स्नात्वासंतर्प्यदेवादीन्जगामपुलहाश्रमं १० ॥ रामः ॥

केयुलेयस्यतेतमस्ताम्वपिवापम
भ्रूणिवृयस्यतं ३४ अरुणोगरिरिवादैत्यःपोलोयावाभूमिः ६ श्रीधामानिश्रंम्लानानिपंकजानियस्यां
तां ८ कितमयायतःइतिश्रवतउद्गात् ९ अनुस्रोतेनानुलोमतःपुलहाश्रमेहरिक्षेत्रे १० ॥ ॥

उत्तमश्लोकस्यसत्योमनोहराःविषयेवैतृष्ण्यजनकाःविरमेतात्मापियामानस्याभावेवैतृष्ण्येनाःकथाःविशे
षज्ञःसारवित्तविषण्णःविषादंप्राप्तःकामःकणाश्रवणेत्रवणात्तदेवतासांतेनयात्मानर्णानाहमावागिति २ ताम
वकरौतत्कर्मकर्तारौमनश्चतदेवमनःयत्स्थिरजंगमेषुव्याप्यगणोवसंतमानिचतत्तेषुवसंतंस्मरेत्सः
तस्यपुण्यकथाःशृणोतिसएवकर्णः ३ उभयलिंगंस्थिरजंगमचलस्यैवलिंगमितिचमत्वाप्रानमेत्तदे

कोन्नुश्रुत्वासकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः विरमेतविशेषज्ञोविषण्णःकाममार्गणैः २ सा
वाग्ययातस्यगुणान्गृणीतेकरौचतत्कर्मकरौमनश्च स्मरेद्वसंतंस्थिरजंगमेषुशृणोतितत्पु
ण्यकथाःसकर्णः ३ शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्पश्यतितद्धिचक्षुः अंगानि
विष्णोरथतज्जनानांपादोदकंयानिभजंतिनित्यं ४ सूतउवाच विष्णुरातेनसंपृष्टोभगवान्
बादरायणिः वासुदेवेभगवतिनिमग्नहृदयोब्रवीत् ५ शुकउवाच कृष्णस्यासीत्सखाकश्
चिद्ब्राह्मणोब्रह्मवित्तमः विरक्तइंद्रियार्थेषुप्रशांतात्माजितेंद्रियः ६ यदृच्छयोपपन्नेनवर्त
मानोगृहाश्रमी तस्यभार्याकुचैलस्यक्षुत्क्षामाचतथाविधा ७ पतिव्रतापतिंप्राहम्लायतावदनेनसा
दरिद्रंसीदमानावैवेपमानाभिगम्यच ८ ॥

वशिरःतदेवतस्यलिंगमितिमत्वायत्पश्यतितदेवचक्षुःतान्येवांगानिपादोदकंभजंति ५ तथाविधा
कुचेलीकिंचित्क्षुत्क्षामायत्किंचित्संपन्नेनतस्मैपरिविष्यस्वयंक्षुधाजीर्णा ७ म्लायताशुष्यतासीदमा
नामर्त्तिंभोगसंपादनाशक्त्याश्रवसीदंतीववेपमाना ८ ॥

विवक्षुः वक्तुमिच्छुः किं वदिष्यतीति भिया तूष्णीमासन्निति २५ अन्यः पराजयः रणः संग्रामः २८ अर्थ वद्वाक्य २९ दिष्टं प्राचीनं कर्म तत्समुपागतः संगतः ३० क्रत्वंगं यज्ञमूर्तिं ३१ आत्मनि अधिष्ठाने विश्व

युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः २५ गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ मण्डलानि विचित्राणि चरन्ताविदमब्रवीत् युवां तुल्यबलौ वीरौ हे राजन्हे वृकोदर एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकम् २७ तस्मादेकतरस्येह युवयोः समवीर्ययोः न लक्ष्यते जयोऽन्यो वा विनिवृत्तफलो रणः २८ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् अनुस्मरन्तावन्योन्यं दुरुक्तं दुष्कृतानि च २९ दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः ३० तं पुनर्नैमिषं प्राप्तमृषयोऽयाजयन्मुदा क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहं ३१ तेभ्यो विशुद्धं विज्ञानं भगवान्व्यतरद्विभुः येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः ३२ स्वपत्न्यावभृथस्नातो ज्ञातिबन्धुसुहृद्वृतः रेजे स्वज्योत्स्नयेवेन्दुः सुवासाः सुष्ठ्वलंकृतः ३३ ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः अनन्तस्याप्रमेयस्य मायामर्त्यस्य सन्ति हि ३४ योऽनुस्मरेत रामस्य कर्माण्यद्भुतकर्मणः सायं प्रातरनन्तस्य विष्णोः स दयितो भवेत् ३५ इत्यामे बलदेवतीर्थयात्रायामेकोनाशीतितमः ७९ ॥ राजोवाच भगवन्यानि चान्यानि मुकुन्दस्य महात्मनः वीर्याण्यनन्तवीर्यस्य श्रोतुमिच्छामि हे प्रभो १ ॥

गं सर्वानुस्यूतं येनैव विदुः प्राप्नुवंति तत् तद्विशुद्धं विज्ञानं व्यतरत् ३२ इति श्रीभागवते दशमे एकोनाशी तितमः ७९ अथाशीतितमे कृष्णः श्रीदामानं गृहागतं संपूज्याह स्वकर्थपो गुरुवासकथां मुदा ॥

समर्हणमुपायनेऽउपहृत्य समर्घ्यं पादावनेजनीरयः ११ धमनीभिः सेवितेत्याज्ञं १२ अवधूतो मलिनेविस्म

प्रीतो यमेन व्रतविहितैर्ब्राह्मण्यो पुष्कलैस्तदा । अथो पवित्रपर्यङ्के स्वयं संस्थाप्य समर्हणाम् ११ उपा
हृत्यावनिज्यास्य पादौ पादावनेजनीः अथ ह्रीक्षिरमाराजन्भगवाँल्लोकपावनः ११ अलि
पुष्पधूपैश्च गन्धेन चन्दनागुरुकुङ्कुमैः धूपैः सुरभिभिर्मिश्रैः प्रदीपावलिभिस्तदा १२ अर्चितावेद
नाभूले यावद्वागतमब्रवीत् १२ अवेलमलिनेनास्महिजपमनिमतेनं देवोपर्युपस्त्वा
ताच्चामरव्यजनेन वै १३ अतः श्रजनार्हस्वाक्षमनामकीर्तिना विस्मितोऽभूदतिप्रीत्या
स्वयुक्तं समाश्रितं १४ किं मनन्नकृतं पुण्यं मध्यमतेन मितायाः श्रियाहीनेन लोकेऽस्मि
न्नाहितेनाथमेनच १५ यासौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः पर्यङ्कस्थोऽप्रियहि
त्वापरिष्वक्तोऽग्रजो यथा १६ कथयावक्रतां गाथां पूर्वां गुरुकुलेऽमतः अभनिनोऽस्त
लिताराजन्कौतूहलपरस्परम् १७ श्रीभगवानुवाच अपिब्रह्मन्गुरुकुलाद्भवताल
ब्धदक्षिणात् समाहृतेन धर्मेन भार्योढा महर्षीनवा १८ ॥ यमः ॥

यमाह १४ सेवितः समानितः १६ सतोऽर्वस्रतोर्गृहाद्गृहीत्वा १२ भार्यापरिणीतानवेतिहहस्यालि
गदर्शनात्भोगादर्शनाच्च संशयादिवप्रश्नः अप्रतिषिधाद्गृहमगतो मत्वाहप्राथयति १८ ॥ यमः

95

भोजहस्तपंथकेश्वरइतितत्त्वीकारमोत्रणामेर्दूतेदास्येतीतिभावः ११ नात्यभीष्टानपरिपाकविमार्श
त्वात् १२ अथापित्तिकिमस्तीतिप्रश्नः १४ महामममगुल्मानिमित्तन्यस्थानानिकश्याःप्रतोलीःश्वतीया

नगअग्रस्थान्हिभवतःसत्तासात्वाक्रियःपतिः ब्रह्मणापक्षणगापश्चभगवान्मात्वत्तर्षभः ९ तमुपै
हिमहाभागमाहमोचपरायणां दास्यतिहविताम्भेतिमीदतेतेऊर्ध्वचिन १० आत्वेपुनाहमस्वार्था
भोजहस्तपंथकेश्वरः स्मरतःपादकमलमात्मानमपियच्छति ११ किन्त्वर्थकामान्भजतोना
त्यभीष्टानजगद्गुरुः एवंसमार्ययाविप्रोबहुशःप्रार्थितोमहः १२ अयंहिपरमोलाभउत्तम
श्लोकदर्शनं इतिसंचिंत्यमनसायमनायमतिंदधे १३ अप्यस्त्युपायनंकिंचिद्गृहेकल्या
णिदीयतां याचित्वाचतुरोमुष्टीन्विप्रान्पृथुकतण्डुलान् १४ चैलखंडेनतान्बद्धाभर्त्रेप्र
दादुपायनं सत्वानादायविप्राग्र्यःप्रययौद्वारकांकिल १५ कथंसेद्रक्ष्यामिकृष्णस्यादि
तिचिंतयन् त्रीणिगुल्मान्यतीयायतिस्रःकक्षाःससद्विजः १६ विप्रोगम्यान्धकवृष्णीनांगृहे
ष्वच्युतधर्मिणां गृहंद्व्यष्टसहस्राणांमहिषीणांहरेर्द्विजः १७ विवेशैकतमंश्रीमद्ब्रह्मानंद
गतोयथा तंविलोक्याच्युतोदूरात्प्रियापर्यंकमास्थितः सहसोत्थायचाभ्येत्यदोर्भ्यांपर्यग्रही
न्मुदा सख्युःप्रियस्यविप्रर्षेरंगसंगातिनिर्वृतः १८ ॥

गग्रतिक्रम्यजगामसद्विजःद्विजैःसहितः १६ ततश्चागम्यान्धकवृष्णीनांगृहेषुच्युतधर्मिणांगृहं
द्व्यष्टसहस्राणांचयेगृहाःतेषुत्रममेकंश्रीमत्तएकतमंगृहंविवेशतदाचसद्विजोब्रह्मानंदंगतोयथात
थाबभूवेतिशेषः १७ अविदितभ्रान्तेनद्वाराणि १८ ॥

